मन्दाः [illegible] कस्य साध्याभावा [illegible] प्राचीनपाठद्वयमप्यतिदुष्टमेवेत्यवधेयम् १

प्रमेयसामान्याभावनिरासस्फुटीकरणाय भावत्वेनाभावानामित्याद्यभिहितमिति
केचित्तु वदन्ति तेनेति द्वितीयो वह्निपदं वह्न्यधिकरणत्वपरं तथा च वह्न्यधिकरणता
त्वेन प्रमेयाभावस्य स्वरूपसंबंधावच्छिन्नप्रतियोगिताकस्य निर्वह्न्यावृत्तित्वप्रसि
द्ध्या साध्यतावच्छेदकसंबंधावच्छिन्नाभाववत्त्वेऽपि न संगतिरित्याहुः तन्नसं
साध्यतावच्छेदकपर्याप्त्यादिपरिष्कारे तस्य लक्षणाघटकत्वानुपपत्तेः वस्तुतः
साध्यतावच्छेदकसमनैयत्यस्य [illegible] साध्यतावच्छेदकपर्याप्त्यादिविशेषणयो [illegible]
[illegible] पादानकल्पयोरन्यतरस्मिन् दीधितिकारानुमतत्वेनोक्तस्य द्वये
प्यभाववत्त्वादिना भावाभावानां सर्वेषां लक्षणाघटकत्वसमानत्वस्यैव स्यात्
किंतु विकल्पेन तादृशकल्पद्वयमपि तदनुमतमेव एवं च प्रथमकल्पे सर्वेषा च. ९
मभावानां द्वितीयकल्पे च घटत्वपटत्वोभयाभ्यां प्रमेयाभावमात्रस्य लक्षणाघ
टकत्वाभिप्रायकतया दीधितिसंगतेर्यथाश्रुतप्राचीनपाठएवयुक्त इत्याभाति॥

टत्वानपायाद् इति वाच्यं सोऽद्भूतमात्रसिद्धाभावमादायाव्याप्ते
रिहातं मवारपीयत्वात् अन्यथा व्यधिकरणधर्मावच्छिन्नाभावमा
दायैवाव्याप्तेः नचैवमपि भावत्वेनाभावानामिति दोषस्यासंगतिर्दु
र्वारैव तादृशाभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणाभाव
त्वादिविशिष्टस्य स्वरूपसंबंधेन वृत्तिमत्तया तादृशाभावस्य लक्ष
णाघटकत्वानिर्वाहाद् इति वाच्यं तादृशाभावस्य घटत्वादिना पटाप्र
भावसमनियततया तद्भिन्नत्वेन निरुक्तावच्छेदकताकप्रतियोगि
ताभिन्नघटत्वाद्यवच्छिन्नप्रतियोगिताकत्वेन लक्षणाघटकत्वसंभवात्
घटत्वादिना पटाद्यभावस्यैव कंठतो वक्तुं शक्यत्वेपि प्रतियोगितायाः

शेषणस्याघटितत्वपरिष्कारे वैयर्थ्यात् न च कालादौ न चैवं ह्रदत्वमात्रवृत्तिवह्नि
निष्ठतत्तद्व्यक्तित्वादेर्गगनत्वादेश्चाधेयतानवच्छेदकतया तदवच्छिन्नाभाव
मादाय दोषापत्तेः साध्यतावच्छेदकव्यापकत्वस्य प्रतियोगितावि
शेषणस्य वैयर्थ्यमिति युक्तं दोषतादवस्थ्यमिति वाच्यं तादृशावह्नि
जलाद्यन्यतराभावत्वावच्छिन्नानुरोधेन तदावश्यकत्वात् तादृशान्यत
रत्वादेः साध्यतावच्छेदकतया ~~[illegible]~~ तदवच्छिन्नाभावाप्र
सक्तेः तद्भिन्नाधिकरणस्य साध्यवतोऽप्रसिद्ध्या च तद्विशेषणान्तर
णात्तदवच्छिन्नाभावाप्रसक्तेः नचैवमप्युक्तविवक्षायां जलत्वादिनाऽ
प्रमेयाभावमादाय वह्निमान् धूमादित्यादावव्याप्तिः जलत्वादिवि चं
शिष्टाधिकरणस्य साध्यवतोऽप्रसिद्ध्या तादृशाभावस्य लक्षणाघ ८

नचैवंतत्तदन्यभावस्यसाध्यतावच्छेदकव्यापकप्रतियोगिताकत्वाभावाद्व्यभिचार
पासंभवात्साध्यतावच्छेदकापर्याप्तेस्यादेर्वैयर्थ्यमितिवाच्यंवह्निघटोभया
भावाद्व्यभिचारवारकत्वेऽपिलक्षणान्यक्षणावृत्तित्वविशिष्टवन्यभावादेश्चवारणा
यतदावश्यकत्वात् नचैकत्वप्रागभावविशिष्टवन्यभावस्यवह्निजलोभ
२ याभावस्यवारणायवैशिष्ट्यस्यसव्यत्वनिवेशोनवच्छिन्नत्वेनप्रति
योगितायाविशेषणीयतयाततएनिरुक्तविशिष्टाभावोभयाभा
वयोरव्यभिचारासंभवइतिवाच्यंवह्निजलोभयाभावादेर्वारणायप्र
तियोगितायामाधेयतावच्छेदकावच्छिन्नत्वस्यैवनिवेश्यतयावह्निघ
टोभयाभावादिवारकतयासाध्यतावच्छेदकापर्याप्तेस्यादेःसार्थक्य
संभवात्विशेषणान्तरणताद्रूप्येणाभाववारणासंभवेऽपिप्रकृतवि

नुक्तात्वत्वेनेतिवाच्यंस्वरूपसंबंधेनवह्न्यादेरवृत्तितया वृत्तिमान्वृत्ति
गगनत्वादिनेत्यनेनतस्यापिसंग्रहीतत्वात् नचैवंसंयोगादिनावह्न्य
भावस्यैवलक्षणाघटकत्वसंभवाद्वह्नित्वेनप्रमेयाभावानुधावनवैय
र्थ्यमितिवाच्यंवह्निमान्धूमादित्यादौद्विक्षणमात्रवृत्तिवह्नेस्तद्व्य
क्तित्वेनाभावमादायाव्याप्तिवारणायसाध्यतावच्छेदकव्यापक
त्वस्यप्रतियोगितायांनिवेशनीयतयाप्रमेयसाध्यकेवह्न्यभावस्य
लक्षणाघटकत्वात् द्विक्षणकालवृत्तिवह्नेः स्वक्रियाजन्यसंयोगा
नाश्रयतयासंयोगेनवृत्तिमत्वाभावेनतदभावस्ययत्सर्वास्वधि
करणेसाधुत्वक्रमेणलक्षणाघटकत्वसंभवात् द्रव्यवान्धूमादित्या चु
दौगगनाभाववारणायोक्तविशेषणस्यावश्यकत्वाच्च नचैवमे

तावान्नत्वादेः साध्यतावच्छेदकावच्छिन्नत्वसाध्यतावच्छेदकसंबंधाव
च्छिन्नत्वोभयाभाव एव निवेश्यः नचवृत्यनियामकसंबंधेनसाध्यता
यातादृशसाध्याभावाप्रसिद्धिः संबंधांतरावच्छिन्नव्यधिकरणधर्मावच्छि
न्नसाध्याभावस्यप्रसिद्धेः साध[redacted]वच्छिन्नत्वसाध्यतावच्छेदक
संबंधावच्छिन्नत्वोभयाभाववत्प्रतियोगितासामान्यकसाध्यतावच्छेद
कत्वस्यकेवलान्वयित्वस्यवृत्यनियामकसंबंधेनसाध्यतास्थलेप्य
भावतयातत्रापिसाध्याभावप्रसिद्धिमात्रेणलक्षणासमन्वयाभिमा
नमूलकतयाग्रंथस्यायोग्यत्वात् एवंचस्वरूपसंबंधेनप्रमेयसाध्यके
संयोगेनवन्हित्वेनप्रमेयाभावस्यापिलक्षणघटकत्वसंभवान्निवेश्या
विशेष्यानासंगतिः नचैवंस्वरूपसंबंधेनवन्हित्वेनप्रमेयाभावो[redacted]ा

साधिकरणधर्मविशिष्टाधिकरणतायाः साध्यतावच्छेदकसंबंधावच्छि
न्नायाः विवक्षणीयतया स्वरूपसंबंधेन प्रमेयसाध्यककल्पेऽव्याप्ते
स्तेन प्रमेयाभावस्य लक्षणघटकत्वपरतया दीधितिग्रंथसंगतेः
वन्हेः स्वरूपसंबंधेनाधिकरणप्रसिद्ध्या वन्हिनिष्ठावच्छेदकता
यावदन्यत्र प्रतियोगिकोद्धनं तत्र धारादितिवाच्यं तथा सति निर्व
न्हादिसाधारण्यसंगतेः स्वरूपसंबंधावच्छिन्नप्रतियोगिताकत्व
ना द्रव्याभावस्य केवलान्वयित्वात् अत आहुः वन्हिमान्धूमादि ८६
त्यादौ संबंधांतरावच्छिन्नाभाववारणाय साध्यतावच्छेदकसंबंधाव श्री
च्छिन्नत्वस्य प्रतियोगितायां विशेषेणोक्तस्य नियामकसंबंधेन साध्य

२ ष्णतासाध्यत्वाधिकरणत्वेनातत्स्य विवक्षणासमवायितयावाच्यत्वाभाव
संग्रहः सुकरः तथापि समवायितयावाच्यत्वाभावसंग्रहानुरोधेनैवा
स्य परिष्कारे यथाश्रुतविशेष्यविशेषणभावापन्ने तदसंग्रहे संदर्भा
संगतिर्दुर्वारैव परं तु यस्यांशाधिकरणधर्मविशिष्टस्य साध्यताव
च्छेदकसंबंधेनाधिकरणं साध्यवदिति विवक्षायां यथाश्रुतविशेष्य
+ विशेषणभाव एव तत्संग्रहः संभवति समवायिना साध्यतावच्छे
दकस्वरूपसंबंधेनाधिकरणाप्रसिद्ध्या समवायित्वनिष्ठावच्छेद
कताया यत्पदेन धर्तुमशक्यत्वात् अथैकस्मादयेव पिवह्नित्वेन पाठ
मेयाभावासंग्रहः वह्नेः प्रमेयत्वात् तदसत्त्वात् न च प्रथमे सा
ध्यतावच्छेदकसंबंधेन वृत्तिमत्त्वस्य साध्ये विवक्षणात् द्वितीये च यस्या

भाववारणायव्यासज्यपरस्यनवच्छिन्नत्वेनापिप्रतियोगितायाविशे
षणीयतयाघटवृत्तिवाच्यत्वघटान्यवृत्तिवाच्यत्वोभयाभावस्या
पितल्लक्षणापातकत्वमित्यवधेयं [redacted] साध्यवृत्तिधर्मनिष्ठेसनेनेति
अत्रयत [redacted] द्वित्वाद्यधिकरणंसाध्यंमि
तिप्राचीनःपाठः यत्समर्याप्त्यधिकरणधर्मविशिष्टाद्यधिकरणंसाध्य
वदितिनवीनःपाठः अत्रप्राचीनपाठेगगनत्वेन [redacted] प्रमेयाभावा
संग्रहोदोषःनवीनपाठेसमवायितयावाच्यत्वाभावासंग्रहः प्रति:
योगितावच्छेदकीभूतसमवायित्वविशिष्टाद्यधिकरणस्यवाच्यत्ववतः
प्रसिद्धेः यद्यपिप्राचीनपाठेसाध्यवृत्तिमत्त्वनिवेश्यगगनत्वेनप्रमेया श्री
भावसंग्रहवन्नवीनपाठेयत्समर्याप्त्यधिकरणधर्मविशिष्टाद्यनिरूपितः ९

रा

श्री: व्यधि· २१ साध्यतावच्छेदकसमनियतेति यद्यप्येवंवाच्यत्वसाध्यकेघ
टत्वजातिविशिष्टवाच्यत्वाद्यभावस्यैवतल्लक्षणाघटकत्वसंभवात्सौंदड्मता
वलंबनवैयर्थ्यमितिनूतनकानुसार: तथापिकिञ्चित्तत्तत्सरबोध्यत्व
प्रकारतानिरूपिततत्तन्निष्ठविशेष्यतारूपवाच्यत्वस्य तत्तदर्थभे
देनभिन्नतया घटत्वजातिवाच्यत्वाभावप्रतियोगितया: पटादिवृत्ति
वाच्यत्वावच्छिन्नतयानवाच्यत्वत्वसमनैयत्यमित्याननाय: नचैव
मप्येतल्लक्षणान्यलक्षणघटकजातिविशिष्टवाच्यत्वाभावस्यलक्षणघटक
त्वसंभवात्सौंदडमतानुसरणावैयर्थ्यंदुर्वारमितिवाच्यं एतल्लक्ष
णान्यलक्षणघटकजातिविशिष्टवन्ह्याद्यभाववारणाय वैशिष्ट्यानवच्छि
न्नत्वेनप्रतियोगितायाविशेषणीयत्वात् तार्णातार्णवन्ह्युभया

नियामकं यतः संबंधांतरावच्छिन्नसाध्याभावव्यापकत्वं यत्र साध्यतावच्छे
दकसंबंधावच्छिन्नत्वं न निवेशनीयं किंतु साध्यतावच्छेदकावच्छिन्नत्व
साध्यतावच्छेदकसंबंधावच्छिन्नत्वोभयाभाववद्भेदं निवेश्यः एवं
च प्रमेयत्वसाध्यकवृत्तौ संयोगेन वह्नित्वेन प्रमेयाभावस्याप्रसिद्धौ
प्रसिद्धस्यापि लक्षणाघटकत्वसंभवः भेदाभावसामान्यानि सर्वत्र प्रमे
याभावाभिधानं साध्याभावत्वस्फुटीकरणाय वह्नित्वेन प्र
मेयाभावस्य वृत्तिकायामप्रसिद्धत्वं तु गंगेशोपाध्यायाभिप्राये पौतिनयं चतुः ४
धात्मगतिः एवं चैतादृशाप्रयोगे न उभयाभावानां लक्षणाघटक
त्वसंपादनाय प्रतियोगितया घटत्वेन घटाप्रतियोगिकाभावस्य लक्षणाघटकत्वाभि
धानमसौ चिंतनीयं यथाश्रुते एवं तद्व्यापकत्वेऽरीत्या व्याख्याने अनुसरणीयम्।
सोऽयं भेदः इत्यनुमानमितिध्येयं

निरूपितत्वाश्रयत्वेः न च गगनत्वाद्यवच्छिन्नाभावानुसरणाद्वैयर्थ्यं स्ये
वत्वांकितत्वाद्वन्हित्वादिना प्रमेयाभावस्यासंग्रहेपू वाभिप्रेतत्व
निर्वाच्यं तथा सति वन्हित्वेन निर्वन्हौ विनिर्दिष्टस्य संगतेर्दुर्वारत्वप्र
संगात् तथापि यस्य यत्प्रयाधिकरणधर्मविशिष्टाधिकरणतायाः सा
ध्यतावच्छेदकसंबंधावच्छिन्नाया विवक्षणीयत्वात्तथा स्वरूपसंबंधेन
प्रमेयसाध्यके तेन संबंधेन वन्ह्यधिकरणाप्रसिद्ध्या वन्हित्वा
वच्छेदकतायाः साध्ये नोपादानासंभवेन वन्हित्वेन प्रमेयाभावस्य।
विलक्षणघटकतया ग्रंथसंगतिः न च स्वरूपसंबंधेन प्रमेयसाध्य
के वन्हित्वेन प्रमेयाभावस्य साध्यतावच्छेदकसंबंधावच्छिन्नप्रति
योगिताकस्य केवलान्वयित्वात् निर्वन्हौ विलक्षणस्य संगतिर्दुर्वारे
नि

श्रीराम व्याधि · २१ नचैवमित्यादि यद्यपि गगनत्वेन प्रमेयाभावस्य साध्यतावच्छे
दकपर्याप्त स्वसमानाधिकरण गगनत्वनिष्ठावच्छेदकताकप्रतियोगिताक
न्यायलक्षणघटकत्वासंभवात्तादृशाभावानुसरणमनुपपन्नमेव न च समनि
यताभावेको गगनत्वेन प्रमेयाभावस्य व्यधिकरणधर्मावच्छिन्नाभावाभिन्न
तया समानाधिकरणधर्मनिष्ठावच्छेदकताकप्रतियोगिताभिन्नव्यधि
करणधर्मावच्छिन्नप्रतियोगिताकान्यायलक्षणघटकत्वसंभव इति वा
च्यं गगनत्वावच्छिन्नप्रतियोगिताया लक्षणाघटकत्वे तदभिधानस्या
संगतानुचितत्वात् तथापि साध्यतावच्छेदकधर्मनिष्ठावच्छेदकताकप्रतियोगिता
भिन्नत्वनिवेशात् केवल्यघटत्वपटत्वोभयावच्छिन्नप्रमेयाभावोसंग्रहस्य सा १६
ध्यतावच्छेदकधर्मनिष्ठस्यानेन पर्याप्त्याधिकरणधर्मविशिष्टाधिकरणांसा
ध्यवत्तत्वस्यैवैतत्केल्येऽपि घटत्वपटत्वयोः प्रत्येकं स्वसमानाधिकरणतया

तदुभयावच्छिन्नप्रमेयाभावस्यापि लक्षणाघटकत्वानुपपत्तिवारणाय स्व
समानाधिकरणधर्मनिवेशनेन यत्स्वपर्याप्त्यधिकरणधर्मविशिष्टाधि
करणं प्रतियोगिमत्त्वं तस्यापि विवक्षणीयतया गगनत्वनिष्ठावच्छेदक
ताया अन्यत्र प्रतियोगिकोटावनन्तर्भावात् नचैवं व्यधिकरणधर्मा
स्या वच्छिन्नाभावस्यापि लक्षणाघटकत्वाभिधानासंगतिः घटत्वेन पटाभाव
प्रतियोगितावच्छेदकघटत्वविशिष्टाधिकरणस्य प्रतियोगिमत्त्वःप्र
सिद्ध्या तस्य लक्षणाघटकत्वासंभवात् एवं समवायितया वाच्यत्वा
भावस्य लक्षणाघटकत्वानुपपत्त्या मूलविरोधश्चेति वाच्यं यत्स्वपर्या
प्त्यधिकरणधर्मविशिष्टाधिकरणता प्रतियोगिनिरूपितत्वस्यैव चं.
विवक्षणेन सामञ्जस्यात् यद्यप्येवमपि वह्नित्वेन प्रमेयाभावस्य ल ३
क्षणाघटकत्वानुपपत्तिः वह्नित्वविशिष्टाधिकरणतायाः प्रतियोगि

तस्मैव विलक्षणीयं तथा सति केवलान्वयि निवेशिष्ट्यस्यासत्त्वमिति धर्माव
च्छिन्नसाध्याभावप्रसिद्धिसंभवेन सोंऽदउमतानुसरणवैयर्थ्यं नु तथा
चाभावे यत्किंचिन्निवेशस्यासंभवादुक्तरीत्याऽभिमानोक्तिः संगच्छत एव
॥ यत्तु यद्रूपसाध्यतावच्छेदकं विशिष्टमविशिष्टं वेति यद्यपि प्रमेयत्ववि
शिष्टसाध्यतावच्छेदककस्थले घटाद्यभावस्य लक्षणघटकत्वेपि बाधका
भावाद्विशिष्टमित्यादिव्यर्थमाभाति तथापि प्रमेयत्वादिविशिष्टत्व
वतः संयोगादिना साध्यतायां घटाद्यभावमादायाव्याप्तिवारणाय प्र
मेयत्वविशिष्टत्वावच्छिन्नत्वपर्यन्तं निवेश्यमिति चेत् तत्सूचनाय विशिष्ट
मित्याद्युक्तं न च तथात्वेपि व्यधिकरणधर्मावच्छिन्नाभावमादायाव्या
प्तिर्दुर्वारैव तत्र व्याप्तेरष्टत्वे च विशिष्टमित्यादिव्यर्थमिति वाच्यं
व्यधिकरणधर्मावच्छिन्नाभावमादायप्रसंभवस्यैव सत्वेन तद्दोषोऽभिमान

ना[illegible]त्वस्य[illegible]समन्वयात् उक्तान्यतराभावादिविशिष्टभेदमादायाति
व्याभिचारकतया साध्यतावच्छेदकापर्याप्तेस्यादेः साध्यकस्य हेतोर्न
थाप्यतत्वलक्षण[illegible]यवन्हिमान् धूमादित्यादावव्याप्तेः साध्यतावच्छे
दकावच्छिन्ना[illegible]गुरुधर्मावच्छिन्नसाध्यकेऽभावस्याप्रसिद्धेः अधिकरण
धर्मावच्छिन्नसाध्याभाववति च हेतोरवृत्तेः न च साध्यतावच्छेदका
वच्छिन्नाभावनिवेशापेक्षया शेषः समान इति वाच्यं साध्यतावच्छेद
कावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नत्वरूपपारिभाषिकसाध्य
तावच्छेदकावच्छिन्नत्वनिवेशेन तद्भावनवकाशात् न साध्यतावच्छेदका
पर्याप्तत्वेन न साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकापर्या
प्तत्वविवक्षायां च द्रव्यत्वाद्यवच्छिन्नाभावमादाय धूमवान् वन्हेरित्या
दावतिव्याप्तेः न चैवं तत्त्वेऽपि साध्यव्याप्यतावच्छेदकापर्याप्त[illegible]स

अथ यत्किंचित्सामानाधिकरण्यरूपतया साध्यतावच्छेदकावच्छिन्नसाध्याभाव
स्यतद्व्यक्तित्वेन प्रवेशे साध्यतावच्छेदकापर्याप्तेः स्याद्वैयर्थ्यं दुर्वारमेवम्
च यत्किंचित्त्वानिवेशोऽपि स्वसमानाधिकरणेत्यादिविनोपपो[illegible]नु
[illegible]स्वस्वप्रवेशेऽननुगमः प्रतियोगिनि स्वत्वप्रवेशेनानुगमा
नवकाशात् साध्यतावच्छेदकापर्याप्तस्वनिष्ठावच्छेदकतानिरूपकत्व
स्वसामानाधिकरण्योभयसंबंधेन धर्मविशिष्टान्यत्वस्य प्रति
योगितावि[illegible] प्रतियोगिन्यपि स्व
त्वानिवेशात्त्वेति चेन्न निरुक्तप्रतियोगिताकाभावनिष्ठसामाना
धिकरण्यसंबंधावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदस्वत्व
स्यव्यासक्तत्वे[illegible]नाभावे यत्किंचित्त्वानिवेशात्तत्सामानाधिक
रण्यसंबंधेन साध्यतावच्छेदकावच्छिन्नसाध्याभाववति निरुक्तभेद

श्री: व्यधि॰ २॰ साध्यतावच्छेदकापर्याप्तेस्यादि यद्यप्येवं निवेशस्य निर्दुष्टत
याऽस्याभिमानेनेयसंगतं न च सद्धेतुमात्रेऽव्याधिकरणधर्मावच्छिन्नसाध्या
भावस्य लक्षणकत्वादसंभवप्रसंगादभिमानोक्तिः संगच्छत इति वा
२। च्यं तथाविधयत्किंचित्साध्याभावनिवेशेन व्यतिरेकिमात्रे साध्यता
वच्छेदकावच्छिन्नसाध्याभावमादाय लक्षणसंगतेः न चैवं साध्य
तावच्छेदकापर्याप्तेस्यादेर्वैयर्थ्यं धूमवान्वह्नेरित्यादौ वह्निधूमा
न्यतराभावमादायातिव्याप्तिवारकतया तत्सार्थकत्वात् तथापि
[illegible] धर्मावच्छिन्नसाध्यके [illegible] वह्निमान् धूमादित्यादावव्याप्तिः
साध्यतावच्छेदकावच्छिन्नाभावस्याप्रसिद्धेः अधिकरणधर्मावच्छिन्नसा
[illegible] साध्याधिकरणत्वं च हेतोरिति